CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री
वाल्मीकि विद्यापीठ

अगस्त २००२ ईसवीयाब्दः

R.N.I. Regd No. UPBIL/1998/1485

सम्प्रार्थये

—मिश्रोऽभिराजराजेन्द्रः कुलपतिः
सम्पूर्णानन्द संस्कृतविश्वविद्यालयः
वाराणसी (उ० प्र०)

(१)
देहि यस्मै धनं दीनबन्धोऽमितम् ।
तं वदान्यं विधेहीति सम्प्रार्थये ॥

(२)
देहि यस्मै यशो दिग्दिगन्ताश्रितम् ।
तं निरीह विधेहीति सम्प्रार्थये ॥

(३)
देहि यस्मै कवित्वं सभारञ्जनम् ।
तं सुकण्ठं विधेहीति सम्प्रार्थये ॥

(४)
वैदुषीं देहि यस्मायकुण्ठां प्रभो ! ।
वाग्मिनं तं विधेहीति सम्प्रार्थये ॥

(५)
देहि यस्यै विभो ! रूपसम्पद्धनम् ।
पद्मिनीं तां विधेहीति सम्प्रार्थये ॥

(६)
देहि यस्यं लसत्कामिनीत्वं नवम् ।
सुन्दरीं तां विधेहीति सम्प्रार्थये ॥

(७)
देहि यस्मै खगत्वं प्रभो ! निर्भरम् ।
तं जटायुं विधेहीति सम्प्रार्थये ॥

(८)
देहि यस्मै पशुत्वं त्रिलोकीपते ! ।
चेतकं तं विधेहीति सम्प्रार्थये ॥

(९)
देहि यस्मै द्रुमत्वं प्रभो ! मञ्जुलम् ।
चन्दनं तं विधेहीति सम्प्रार्थये ॥

(१०)
देहि यस्मै त्रिवेणी-कवेर्जीवनम् ।
तं सहिष्णुं विधेहीति सम्प्रार्थये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष-०१३३ { ४५४२६५, ४५५३७७ (ज्वालापुरम्) तारगृहम्- महाविद्यालयः, (ज्वालापुरम्)

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम्-६३ अङ्कः- २

सम्पादकः

डॉ० हरिगोपालशास्त्री

व्याकरणाचार्यः

एम्०ए०, पी-एच्०डी०

राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः

डा० केशवप्रसाद उपाध्यायः

साहित्याचार्यः

एम्०ए०, पी-एच्०डी०

प्रबन्ध-सम्पादकः

डा० अजयकौशिकः

साहित्याचार्यः

एम० ए०, पी० एच० डी०

प्रकाशकः

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम्- २४६४०५

(उत्तराञ्चल-प्रदेशः)

शुल्क-विवरणम्

प्रत्यङ्कम्	—	५/-
वार्षिकम्	—	५०/-
आजीवनम्	—	५००/-

विषयानुक्रमणिका

१- श्रुतिसुधा	—महर्षिदयानन्दसरस्वती	३
२- समाजकल्याणाय संस्कृतानां सङ्गतिः	—प्रो० रामप्रताप तिवारी	४
३- बुल्बुलं प्रति गीतमेकम्	—डा० रमाशङ्करतिवारी	७
४- भारत-वन्दना	-डा० वासुदेवकृष्णः चतुर्वेदी	१०
५- भारत-राष्ट्र-गीतिः	-डा० वासुदेवकृष्णः चतुर्वेदी	११
६- मीमांसारसपल्वलकारः महामहोपाध्यायः इन्द्रपतिः	-डा० उदयनाथझा 'अशोकः'	१२
७- गोध्रा-हत्याकाण्डं तत्प्रतिकृतिश्च	-प्रो० हरिश्चन्द्र रेणापुरकरः	१५
८- मोदते मे धरा सा जगन्मण्डले	-डा० कीर्तिवल्लभ शक्टा	१८
९- स्वातन्त्र्यवीरगौरवम्	—श्रीपं० स० त्र्यं० रहोतकरः	१९

अपि भवन्तो जानन्ति

अपि ज्ञायते, गीर्वाणवाव्या विश्वव्यापको महाशब्दकोशः केन विरचितः ? शब्दकल्पद्रुमः इति अस्य शब्दकोशस्य नामधेयं यो राजा राधाकान्तमहोदयेन व्यरचि । उपषट्त्रिंशानि वर्षाणि यावदसौ महाभागः कोशरचनाकार्ये व्यापृत आसीत् । पाश्चात्त्य-विद्वत्तल्लजैरपि प्रशंसापात्रीकृतोऽयं कोशः । कोशकार्यप्रभावादेव १८३५ ख्रिस्ताब्दे तस्मै पैरीसनगरवर्तिन्याः एशियाटिक सोसायटी संस्थाया मानार्हं सदस्यत्वं समर्पितम् । इंग्लैण्डदेशस्य राज्ञ्या स सुवर्णपदकप्रदानेन गौरवितः । मॅक्समूलर-प्रभृतयः प्राच्यविद्या-विशारदाः तस्मिन् महाभागे बद्धादरा अभूवन् । एवं किल श्रूयते यद् ऋग्वेदविषयकग्रन्थलेखने मैक्समूलरपण्डितेन राधाकान्त-महाभागस्य साहाय्यं लब्धम् । न केवलं संस्कृतभाषायाम् अपि तु आङ्ग्लभाषायामपि तस्य समानं प्रभुत्वमवर्तत । हन्त ! राधाकान्त महाभागम् अन्तरेण वयं स्तोकमेव जानीमहे ।

['गुञ्जारवः' इति संस्कृतत्रैमासिकात्साभारम्]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

अविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् – ९३ | भाद्रपदः २०५९ विक्रमाब्दः, अगस्त २००२ ईसवीयाब्दः | अङ्कः – २

श्रुति-सुधा

ओ३म् तेऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धावद् वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥

—ऋग्वेद १/८५/७

पदार्थः —

(ते) मनुष्याः । (अवर्धन्त) वर्धन्ते । (स्वतवसः) स्वं स्वकीयं तवो बलं येषां, ते । (महित्वना) महिम्ना । महित्वेनेति प्राप्ते 'बा च्छन्दसि सर्वे विधयो भवन्ति' (महा० १/४/९) इति विभक्तेर्नादेशः । अत्र सायणाचार्येण व्यत्ययेन नाभावः कृतः, सोऽशुद्धः । (आ) समन्तात् । (नाकम्) सुखविशेषं स्वर्गम् । (तस्थुः) तिष्ठन्तु । (उरु) बहु । (चक्रिरे) कुर्वन्ति । (सदः) सुखस्थानम् । (विष्णुः) शिल्पविद्याव्यापनशीलो मनुष्यः । (यत्) यम् । (ह) किल । (आवत्) रक्षणादिकं कुर्यात् । (वृषणम्) अग्निजलवर्षणयुक्तं यानसमूहम् । (मदच्युतम्) यो मदं हर्षं च्योतति, तम् । (वयः) पक्षी । (न) इव । (सीदत्) गच्छन् । (अधि) उपरिभावे । (बर्हिषि) अन्तरिक्षे । (प्रिये) प्रीतिकरे॥७॥ अत्रोपमालङ्कारः ।

भावार्थः —

यथा पक्षिण आकाशे सुखेन गत्वाऽऽगच्छन्ति, तथैव ये प्रशस्तशिल्पविद्याविद्भ्योऽध्यापकेभ्यः साङ्गोपाङ्गां शिल्पविद्यां साक्षात्कृत्य तया यानानि संसाध्य सम्यग् रक्षित्वा वर्धयन्ति, त एवोत्तमां प्रतिष्ठां प्रशस्तानि धनानि च प्राप्य नित्यं वर्धन्त इति ॥७॥

—महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाजकल्याणाय संस्कृतानां सङ्गतिः

—प्रो० रामप्रतापतिवारी
अध्यक्षः संस्कृत विभागे
हे० न० ब० गढ़वाल विश्वविद्यालयस्य
श्रीनगरम्, पौडीगढवालः (उत्तरांचलम्)

मानव-जीवनस्य मुख्यं प्रयोजनम् –

पुरुषार्थसिद्धिरेव मुख्यं प्रयोजनं मानव-जीवनस्य । धर्मार्थकाममोक्षाः पुरुषार्थाः । पारलौकिकसुखायापेक्ष्यते मोक्षः । सांसारिक-सुखाय धर्मार्थकामानां सम्यगनुपालनम् अपेक्ष्यते । केचिज्जनाः धर्मेषु, केचिदर्थेषु, केचिच्च कामेषु संलग्नाः वर्तन्ते, ते समाज-कल्याणाय बाधकाः भवन्ति । त एव कल्याण-कारिणो ये धर्मार्थ-कामान् समधावेन सेवन्ते । महाभारतेऽपि कथितम्—

'धर्मार्थकामाः समसेव सेव्याः ।'

सदाचारिणः पुरुषार्थान् साधयन्ति –

सदाचारवन्त एव इह लोके धर्मार्थकामान् साधयन्तोऽन्ते पारलौकिकं सुखं प्राप्नुवन्ति । आचारः परमो धर्मः । असच्चारिणो न सर्वान् पुरुषार्थान् साधयन्ति ।

संस्कारवन्त एव सदाचारिणः —

त एव सदाचारिणो भवन्ति, ये जनाः संस्कारवन्तो भवन्ति । जन्मना तु सर्वे शिशवः समानाः, कामं तु ते राजगृहेषु भिक्षुगृहेषु वा जायन्ते । तेषु भेदभावभावनाः न विद्यन्ते, परन्तु वर्धमानास्ते यादृशान् संस्कारान् प्राप्नुवन्ति, ते तादृशा एव भवन्ति । यैः कार्यैर्विचारैर्वा शिशुदोषा अप-नीयन्ते तानि कार्याणि विचाराः वा संस्काराः कथ्यन्ते । दोषापनयनं गुणाधानं वा येन कर्मणा क्रियते तत्संस्कारः ।

त्रिविधसंस्काराः —

संस्काराः त्रिविधाः भवन्ति । (१) पितृभ्यां कृतसंस्काराः, (२) परिजनैर्दत्त-संस्काराः, (३) परिजनेभ्यः सामाजिकजनेभ्यो गृहीतसंस्काराः । केचित् संस्काराः पितृभ्यां क्रियन्ते, यथा गर्भाधा नादयः । शरीरमनोभ्यां स्वस्थ एव स्वस्य परेषाञ्च कल्याणं कर्तुं शक्नोति । यथोचितसमये उप्तबीजं सुफलं भवति, एवमुचितसमये कृतेन गर्भाधान-संस्कारेण स्वस्थः शिशुर्जायते । यथा पाणि-ग्रहणसंस्कारः लग्नानुसारं क्रियते, एवमेव गर्भाधान संस्कारोऽपि लग्नानुसारं करणीयः, न निषिद्ध-तिथिषु । यदा क्षेत्रमुर्वरकं सरसञ्च भवति, तदा तस्मिन् शस्यानि स्वस्थानि मरोहराणि च वर्तन्ते, एवं मातरि स्वस्थायां सानन्दायां सत्यां शिशुरपि स्वस्थो भवति । अतः पत्या भार्या सीमन्तोन्नयन-संस्कारेणालङ्कर्तव्या । 'यत्र नार्यस्तु पूज्यते रमन्ते तत्र देवताः ।' जन्मावसरे जातकर्मसंस्कारः क्रियते । नाम-करणसंस्कारावसरे कृतं नाम स जन्मजन्मान्तरेषु धार्यति । तस्य कीर्तियशोऽपयशांसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम्नैव जायते । शिशूनां नामानि सार्थकानि, देवनामाश्रितानि भवेयुरिति प्रयतितव्यम् ।

अन्नप्राशन- संस्कारावसरे सात्त्विकान्नानि दातव्यानि । यतो हि यो यदा यादृशमन्नं खादति, तथा तस्य मनस्तादृशमेव भवति । सात्त्विकान्नाशनेन शिशुः संस्कारवान् भूत्वा पुरुषार्थान् साधयति । उपनयन संस्कारेण शिशुः शिक्षां गृह्णाति । शिक्षितो भूत्वा कर्तव्याकर्तव्यानां कर्मणां विचाराय सक्षमो भवति । निम्नाङ्किता सूक्तिः प्रसिद्धा एव, यथा—

माता वैरी पिता शत्रुर्येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा—

प्राचीनकालतोऽष्टविधाः विवाहाः प्रचलन्ति वर्तमानसमयेऽपि बहुविधाः पाणिग्रहण-संस्काराः क्रियन्ते गान्धर्वादयः । तथापि पितृभ्यामायोजितोऽयं संस्कारः शोभनो भवति । यतो हि पितरौ परिजनाश्चोभयपक्षयोर्गुणदोषान् संवीक्ष्यैनं समायोजयन्ति । पितृभ्यां परिजनैश्च सम्पादितैरेतैः संस्कारैः शिशुः चरित्रवान् भवति ।

केचित् संस्काराः पितृभ्यां परिजनैश्च दीयन्ते । यथा— वृद्धानामाज्ञापालनम् अतिथीनां सत्कारः । यत् सत्कर्म कर्तुं परिजनाः शिशुन् प्रेरयन्ति तत्कर्म एव दीयमानः संस्कारः । परिजनां व्यवहारैः परिजनाः शिशवश्च प्रभाविताः भवन्ति । गृहमेव प्रथमो विद्यालयः शिशूनाम् । परिजनाः यादृशमाचरन्ति, यादृशं वदन्ति, यादृशं खादन्ति, यादृशीं पूजां सम्पादयन्ति, शिशवोऽपि तादृशमाचरन्ति । यतो हि शिशुरपक्वघटवद् भवति । यदि गृहस्थाः परिजनाः दयान्विताः, देशभक्ताः, निःस्वार्थिनः सद्गुणाः, सात्त्विकाः, परोपकारिणः सन्तोषधारिणः सत्यवादिनोऽहिंसकाः, गुरुजनसेवकाः स्त्रीसम्मानकाः शरीर-मनोभ्यां शौचाः वर्तन्ते, तदा शिशवोऽपि एतैर्गुणैः समन्विताः भवन्ति, सुसंस्कृताश्चापि भवन्त्येव ।

केचित् संस्काराः परिजनेभ्यः सामाजिकपुरुषेभ्यो वा गृह्यन्ते । एते संस्काराः न क्रियन्ते, न च दीयन्तेऽपितु सङ्गत्या एव जायन्ते ।सत्संस्काराय सत्सङ्गतिरपेक्ष्यते । सर्व प्राणिनः स्वजातीनां समूहेषु तिष्ठन्त्युत्तिष्ठन्ति च । पशु-पक्षिणोऽपि समूहेषु निवसन्तो वचनाचारान् परस्परं व्यवहरन्ति । मानवोऽपि एकलो नैव स्थातुं शक्नोति । अन्य-मानवैः सह निवसन् स लोकव्यवहारान् जानाति । आहारनिद्राभयमैथुनञ्च नराणां पशुभिः समानं नैसर्गिकञ्च एतद्व्यतिरिक्तमाचरणं मानवेभ्यो गृह्णाति । यस्मिन् कर्मणि कृते न कोऽपि लाभः केवलं कष्टमेव, अलं तत्कर्मणा । मानवः यस्मिन् समाजे यैश्च सार्धं निवसति, स तेभ्यो गुणानवगुणान् वा सङ्गत्या प्राप्नोति ।

सन्मित्राणां, गुरुजनानां, सज्जनानां सङ्गतिं संप्राप्य मन्दिरोत्सवपर्वगोष्ठीषु गत्वाऽसंस्कृतोऽपि संस्कृतः भवति । सत्सङ्गतिना एव भोजनादिकं सात्विकं भवेत्, व्यवहाराः विचाराश्च सात्त्विकाः भवेयुः इति प्रयतितव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सज्जनानां सङ्गत्या मानवः संस्क्रियते । संसर्गजाः दोष-गुणाः भवन्ति। यो येन सह व्यवहरति, सोऽपि तादृश एव भवति । यदि कोऽपि दुष्टैः सह तिष्ठति, सोऽपि दुष्टो भवति किन्तु सज्जनानां संगतिं प्राप्य मानवः सुसंस्कृतो भवति । सुसंस्कृतो मानवः मिथ्याऽविद्याऽसन्तोष-हिंसा-कामुकता-स्वार्थाशौचदर्पलोभ—क्रोधेर्ष्या-द्वेष-पिशुनता-दोषैः प्रभावितो न भवति । सः सत्याहिंसा-ब्रह्मचर्यास्तेयापरिग्रह-शौच—सन्तोष-दया-परोपकार-ज्ञानेन्द्रियनि-ग्रहगुरुजन सेवाऽतिथिसत्कार-कर्तव्यपालन-नियमानुपालन-देशभक्ति-विश्वबन्धुत्वभावना—गुणैः समन्वितो भवति । संस्कारवतां सज्जनानां परिजनेषु सन्मति गुरुजनानामादरः, सन्ततिषु स्नेहः ईर्ष्याद्वेष-लोभ क्रोधादिदुर्गुणानामभावः, अतिथि-सत्कारः, शौच-सन्तोषदया-परोपकारादीनां व्यवहारो भवति ।

सामाजिक-नियमानुपालनेन स्वकर्तव्यानुष्ठानेन च स्वस्याखिलसमाजस्य च कल्याणं भवति । समाज-कल्याणे स्वार्थभाव एव प्रमुखो बाधकः । अतः स्वार्थभावं परित्यज्य सन्तोष-धारणेन समाजस्य कल्याणं भवति । स्त्रीणां सम्मानं सर्वदैव कर्तव्यम् । देवालयानाथालय-तडागादीनां निर्माणमपि सज्जना एव कुर्वन्ति । आस्तिकभावनाः जीव जन्तूनां संरक्षणम्, वृक्षारोपणं, वन वृक्षादीनां संरक्षणं सज्जनाः एव कुर्वन्ति ।

वर्तमान-समये येन केन प्रकारेण बहवो जनाः धनार्जने संयुक्ताः दृश्यन्ते । किन्तु ये सज्जनाः संस्कारवन्तस्ते धर्मानुसारमेव धनार्जनं कुर्वन्ति । यस्मिन् परिवारे सर्वे सुसंस्कृताः संस्कारवन्तो भवन्ति, तत्र शिशवोऽपि संस्कारवन्तो भवन्ति, सदाचरन्ति च ।

सुसंस्कृतो जनः न केवलमात्मन एव हितं करोति, अपितु अन्येषामपि संस्करणं करोति । यथा कस्यचिद् यन्त्रस्य अवयवाः मिलित्वा सुकरं यन्त्रकार्याणि कुर्वन्ति, एवं मानवोऽपि समाजस्याङ्गम् । अतः संस्कृतः सोऽपि सदाचरन् समाजे पुरुषार्थान् सम्यग्रूपेण साधयन् समाजस्य कल्याणं करोति । यदि परिजनाः सुसंस्कृताः भवन्ति तदा तस्मिन् परिवारे शिशवोऽपि सुसंस्कृताः भवन्ति । यदि पिता पितामहस्य सम्मानं करोति तदा सन्ततयोऽपि स्वपितुः सम्मानं कुर्वन्ति । यदा माता च पिता च परस्परानुकूलौ भवतः तदा शिशवोऽपि प्रसन्नाः भवन्ति । यस्मिन् परिवारे सर्वे जनाः मधुराणि वचांसि वदन्ति, परस्परं सद्व्यवहरन्ति; तस्य परिवारस्योन्नतिः सर्वदैव जायते । यत्र संस्कारवन्तः परिजनाः सन्ति, तत्र स्वर्गेणालम् । यथा –

'यदि रामा यदि च रमा यदि
तनयो विनयधो गुणोपेय ।
तनये तनयोत्पत्तिः किमाधिक्यं सुरवरनगरे ।।

संस्कारवतां जनानां सङ्गतिं प्राप्यान्येऽपि संस्कारवन्तो भवन्तु, इति कामना क्रियते मया । येन–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुल्बुलं प्रति गीतमेकम्[१]

—डॉ० रमाशङ्करतिवारी
गन्धमादनम्, २०, लक्ष्मणपुरी
फैजाबाद (उ०प्र०)

(१)

मम हृदयं पीड्यते व्यथयति चेतनामलससुप्तिः,
इव 'हेमलाक' इत्यौषधं ह्यानुष्याम,
अथवा रवस्रवसरसचषकं ह्यशेषतः शोषयेम,
क्षणपूर्वमथवा विस्मृतिनद्यां निमग्नः ।
अहं तव सुखद–सौभाग्याय नो खलु ईर्ष्यामि,
परं तवानन्दे परमानन्दितो वै भवामि,
यत्त्वं वनदेवते श्लथपक्षधारिणि !
कस्मिंश्चित् किल मधुरस्थले,
'बीच' इत्याख्यविटपहरीतिमायाः ह्यसंख्यनां छायानां मध्ये
प्रगायसि ग्रीष्म-कीर्तिं मुक्तकण्ठेन सुखेन ।।

(२)

अभिलषेऽहं पानं सुरायाः शीतीकृतायाः,
सुचिरं विवरे सुगहने च भूम्याः,
ह्यास्वादमानं पुष्पदेवतायाः हरिद्ववर्णप्रदेशस्य,
नृत्यस्य प्रावृट्कालस्य देशगीतस्य रवितप्तमोदस्य ।
अभिलषेऽहं चषकं समुष्णीभूतं दक्षिणेन,
भरितं मदिरया निर्झरात् कविताकला–देवतानाम्,
पूर्णं बुद्बुदैः सदृशैः ह्यक्षमालगुटिकाभिर्निमिषद्भिस्तु प्रान्ते,
कुर्वद्भिश्च वदनं खलु धूम्रवर्णम्,
यतोऽहं पिबेयं मर्त्यलोकं त्यजेयं किल्वदृष्टः,
प्रलीयेय ह्यप्रकाशेऽरण्ये त्वत्सार्धं सुदूरम् ।।

---

(१) ध्यातव्यम्– अयमनुवादः 'कीट्स'-इत्याख्यस्य सुप्रसिद्धकवेराङ्गलस्य लोक-प्रियरचनायाः 'ओड टु ए नाइटिङ्गेल' इत्याख्यायाः । कीट्सो भवति अतिक्षीणप्राणः सौन्दर्योपासकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३)

प्रलीयेयं सुदूरं विगलेयं तथा विस्मरेयम्,
तद् यत्त्वया न ज्ञातं खलु पर्णपुञ्जे कदापि-
श्रान्तिं वै ज्वरार्त्ति किल चैत्तिक-व्यथाम्,
अत्र लोके यत्र मानवास्तिष्ठन्ति शृण्वन्ति वा
इतरेतरं कुर्वन्तं क्लिशिततया दीर्घरावम्,
यत्र पक्षाघातस्पातयति कतिचित् पलित-चिकुरान्,
यत्र यौवनं सञ्जायते विवर्णं प्रेतक्षीणं च म्रियते ।
यत्र तर्कं वितर्कं जनयति दुःख-जालम्,
नैराश्यं खलु प्रतिबिम्बितं वै शून्यनयने,
यत्र सौन्दर्यं न प्रभवति रक्षितुं तस्य दीप्तिमयानिलोचनानि
ह्यथवा नवलप्रेम उत्कण्ठते तेषु परवासरमतीतस्य ॥

(४)

सुदूरं ! सुदूरं ! ह्यं डयिष्ये तव सकाशम्,
नहि मघदेवस्य स्यन्देन चित्रक-संयुतेन ।
परं कविताया: दृग्गोचरपतत्रैः,
यद्यपि ह्यलसमस्तिष्कं मुह्यति स्तम्भते वै ।
त्वया सार्धं प्रागेव भवामि !, रजनी किल कोमला वै,
खलु चन्द्रमहिषी बिराजते सिंहासने तदीये,
परिवृता समन्ततस्तस्यास्तारकविद्याधरीभिः ।
परन्तु ह्यत्र तु विद्यते नो प्रकाशः,
व्यतिरिक्तं तं यस्तूह्यते पवनेन गगनात्
पारं हरित-विमिराणां वक्रशैवलित-पथानाम् ॥

(५)

न प्रभवामि द्रष्टुं कानि पुष्पाणि विद्यन्ते मच्चरणयोः,
ह्यथवा कानि मृदुसुरभिकुसुमानि लोलन्ति विटपेषु ।
परं सौरभित-तिमिरे प्रत्येकं मधुरं फलं तर्कयामि,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्जायते 'मई' इत्याख्ये मासे
तृणं गहनं तथा वनजातफलपादपः ।
श्वेत-कण्टकित-गुल्मः ह्यारण्यकजवा च,
सद्यः क्षीयमाणानि 'वायलेट'–पुष्पपर्णाच्छादितानि,
एवञ्च 'मई'–मासप्रथमप्रसवः
ह्यागच्छद् गन्धपाटलप्रसूनं मदिर-नीहारपूर्णम्,
नित्यशः सेव्यमानं ग्रीष्म–प्रदोषे मर्मरध्वनिमक्षिकाभिः ॥

(६)

तिमिरे शृणोमि त्वदीयं ज्ञानं च संजापे
बहुवारं ह्यर्धप्रेमनि च मरणस्य सुखेन ।
प्रसादयामि तत्तु सुविचारित–छन्दस्सु नेतुम्,
मम निःश्वासं प्रशान्तञ्च समीरे ।
इदानीन्तु प्रतिभाति मतुं सुखतरमनन्यकालापेक्षया तु
समाप्तुं जीवनं खल्वर्धरात्रौ वै कष्टशून्यम् ।
यावत् त्वं वर्तसे स्रावयन्ती तवात्मान बहिश्च हर्षातिशय्ये ।
त्वं वर्तिष्ये गायन्ती चिरं, व्यर्थं धास्यामि च श्रवणे,
भविष्यन् निष्प्राण-लोष्टं त्वदीयं मधुरगीतं कृते ॥

(७)

अयि अमर-पक्षिन् ! त्वं नो जायसे मृत्यु-हेतोः,
बुभुक्षवो मनुज–वंशाः न त्वां पीडयन्ति पदैः ।'
स्वनमहं शृणोमि ह्यर्धरात्रौ श्रुतो वा प्राक्काले सम्राजा वा ग्राम्येण ।
कदाचित् तदेवगीतं खलु यच्च प्राप्तवच्च पथन्तु
शोकाकुल–हृदये रुथायाः यदा गृहातुरा सा'
तस्थौ साश्रुनयना ह्यन्य–देशीये धान्यराशौ ।
तदेव गीतं यत् प्रायशः व्यमोहयत् तु,
ऐन्द्रजालिकवातायनानि फेनेष्वपावृतानि,
सङ्कट–सागराणां विद्याधरीणां वै दूरस्थेषु निर्जनेषु वनेषु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८)

निर्जनेषु शब्दोऽयं सिद्ध्यति मत्कृते क्षुद्रघण्टेव खलु,
प्रतिनयितुं मामेकाकिनं ह्यात्मानं त्वत्त च सकाशात् ।
स्वस्ति ! भावना न प्रभवति वञ्चयितुमेवंविधञ्च
यथा ख्याति–लब्धा भवति विहितुं वेतालिनीयम् ।
अस्ति ! अस्ति ! परिक्षीयते शोकाकुलं गानं त्वदीयम्,
पारं निकटस्थ–गोप्रचारं ह्युपरि शान्तपर्जन्य-धारस्य,
ऊर्ध्वं शैलपादात्तथा भवति निमग्नं दीर्घञ्च गाढम्,
एकान्तरे तरुगहनमार्गे च दर्यास्तु ।
अपि वर्तते स्म वै मनःसृष्टिरथवा दिवास्वप्नः भवति ?
पलायित तद्गीतं 'अपि स्वपिमि ह्यथवा जागृयामि ? ।।'

सन्दर्भाः

['लीथे' इत्याख्यैका सरिता यज्जलं पीत्वा मानवो याति विस्मृतिलोकम्, इति लैटिनपुराशास्त्रे । 'चन्द्रः' स्त्रीलिङ्गी महिषी लैटिनमिथकशास्त्रेऽस्ति । तस्मादेव 'चन्द्र-महषी' प्रयुज्यते । 'रूथ' इत्याख्यैका दुर्भाग्य-प्रताडिता युवती भवति, या 'बाइबिले' निर्वासिता सती स्वदेशात् धान्यकणान् परदेशक्षेत्रेषु संचिनोति ।

अवधेयमिदं यत् कविकीट्सः प्रिय-गीतस्य गीतं केवलं शृणोति न तु पश्यति तं विहगम् । यतो हि सोऽध्यास्ते तरुशाखां गहनपर्णच्छदेषु । कीट्सस्य पङ्क्तयः परिवर्तन्ते इतरेतरं दैर्घ्ये तु । –लेखकः]

भारत–वन्दना

—डा० वासुदेवकृष्णः चतुर्वेदी
प्रधान–सम्पादकः ब्रजगन्धा,मासिकपत्रस्य
९६६, गतश्रम टीला, मथुरा–२८१००१ (उ०प्र०)

(१)

काश्मीरो भालदेशो मणिपुर–मुकुटो राष्ट्र–पंजाब–बाहू
आसामो भू–प्रदेशो हिमगिरि- विदितो यस्य चूडा–किरीटः ।
दिल्ली–कर्नाटकाख्यां नयन–युगलकं मध्य–देशोऽस्ति वक्षः
गोआ–नोकोवराख्यौ चरण–सरसिजे केरलो यद्विहारः ।।

(२)

प्राणा यस्योत्तराख्यो विमल–नरसुतो रामकृष्ण-प्रसादात्
सौराष्ट्रो नासिका वै तमिलमु हरियाणन्ध्रकानीन्द्रियाणि ।
मैसूराङ्गौ सुकर्णावुभयकटितटौ गुर्जरश्चापि बङ्गौ
इत्थं राज्याङ्ग-रूपं जयति हि सततं भारतं राष्ट्रमग्र्यम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारत-राष्ट्र-गीतिः

—डॉ० वासुदेवकृष्णः चतुर्वेदी
६६६, गतश्रम टीला (मथुराः)

(१)

कलित-काव्य-कला-कुल-कीर्तनम्,
मदनमोहन-मानस-पूजनम् ।
भुवन-वैभव-सौरभ-चन्दिरं
जयतु भारत-नामक-मन्दिरम् ॥

(२)

विविध-दर्शन-वाद-सुपूरितं
भगवदीय-सुगीत-प्रसारकम् ।
मुरलिका-स्वर-शोभित-कन्दरं
जयतु भारत-नामक-मन्दिरम् ॥

(३)

समर-शूरकथोत्सव-सद्ध्वजं
पशुप-राजित-गोधन-सुन्दरम् ।
कृषि-महोत्सव-मोहन-तत्परं
जयतु भारत-नामक-मन्दिरम् ॥

(४)

सकल-हिन्दु-जनैरभिनन्दितं
विविधवादपरैरपि वन्दितम् ।
हरिहरार्चन-लग्न-सदिन्दिरं
जयतु भारत-नामक-मन्दिरम् ॥

(५)

दलित- दीन-जनोद्धृतिशूरकं
बहु-विपन्न-मनोरथ-पूरकम् ।
कलित-कीर्ति-कलाधरकं वरं
जयतु भारत-नामक-मन्दिरम् ॥

(६)

सफल-पादप-राशि-सुशोभितं
प्रचुर-नूतन-शस्य-विराजितम् ।
फल-भराधिक-शोभित-चत्वरं
जयतु भारत- नामक-मन्दिरम् ॥

(७)

भवति यत्रमधोः सरितादिकं
हिम्-निदाघ-वसन्त-दिनादिकम् ।
विविध-यौवन-भाव-विभास्वरं
जयतु भारत-नामक-मन्दिरम् ॥

(८)

लसति दोलिकयाऽत्र च श्रावणो,
हसति होलिकया बहु-फाल्गुनः ।
अहह दिव्य-महोत्सव-शेखरं
जयतु भारत-नामक-मन्दिरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशिष्टमीमांसाशास्त्रतत्त्वज्ञः मीमांसारसपल्वलकारः

महा महोपाध्यायः इन्द्रपतिः

–डॉ० उदयनाथ झा 'अशोकः' साहित्यविभागाध्यक्षः
श्रीसदाशिवकेन्द्रियसंस्कृतविद्यापीठम्
पुरी–७५२००१ (उडीसा)

पारिभाषिक-प्रकरणग्रन्थरूपमिदं मीमांसा-रसपल्वलमिति विधिविचारादारब्धम्। तत्रापि आरम्भे विधिविभागबोधकानि भगवतः जैमिनेः सूत्राणि–'विधिर्वा स्याद् अपूर्वत्वात्' नियमार्थं वा पुनः श्रुतिः,' 'उच्यते परिसंख्या' इति निष्टङ्कि, एवमेव हि इन्द्रपतिना विधित्रैविध्यनिरूपिका कुमारिलभट्टपादीया कारिकापि विशदीकृता। यत्—

'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥'

इति तन्त्रवार्तिके।

सामान्यतः अर्थसंग्रह-न्यायप्रकाशादिषु विधित्रैविध्यं वा उत्पत्त्यादि-विधिचातुर्विध्यं वा निरूपितं वर्तते, किन्त्वत्र तु षड्विधिप्रकाशः अपूर्वविधिभेदाः निरूपिताः वर्तन्ते। इत्येवास्ति मीमांसारसपल्वलस्य वैशिष्ट्यम्। तत्र 'दध्ना जुहोति इत्यादि-गुणविधिवाक्यं तृतीयाश्रुत्यादीनां साक्षाद् गुणकर्मणोः अङ्गाङ्गिभावग्रहोपयोगितया तदधिकरणत्वमादौ निरूपितम्। यथा 'श्रुतिलिङ्गादिप्रमाणपुरस्सरम्। तदुक्तं–

श्रुतिलिङ्ग वाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षाद्' इति जैमिनिसूत्रेण (३-३-२४)।

अग्रे तावद् अङ्गताबोधक—प्रमाणषटके श्रुतिप्रमाणं तत्र च श्रुतिलक्षणघटकाङ्गलक्षणमपि निरूप्य लिङ्ग–स्वरूपं तत्प्रसङ्गेन मन्त्राणा–मर्थप्रकाशकत्वं शक्त्या लक्षणया वेति विचारः परामृष्टः। पुनश्च स्तोत्राणामाशदुपकारकत्वं वा सन्ति पत्योपकारकत्वं वेति जिज्ञासा कृता। तस्मिन्नेव प्रसङ्गे मन्त्राणामूह विचारः महामहो पार्थसारथ्यादिमीमांसकमूर्द्धन्यानाम् अभिप्रायेण सह विशदीकृतः। एवमेव द्रव्याणां विकृतिषु छहो अस्ति नवेति विष्णुधर्मोत्तरादि स्मृति–प्रमाणैः तथा एकोद्दिष्टादिपैत्रिक–धर्मशास्त्र–विहित-नियमोदाहरणैः सविस्तरं प्रकटीचक्रुः। अनन्तरं च क्रमप्राप्तानां वाक्य–प्रकरण–स्थान-समाख्यानाम् अङ्गताग्राहक— प्रमाणानां लक्षणोदाहरणादिभिः व्याख्यानं स्पष्टीचक्रुः। अन्ते तावदेतेषां परस्पर–विरोधे कस्य प्राबल्यं कस्य वा दौर्बल्यमिति बलाबलाधिकरणप्रतिपादित-रीत्या पार्थक्येन सन्दर्भोदाहरणादिना ग्रन्थप्रक्रिया समाप्यते।

ग्रन्थेऽस्मिन् तत्र यत्र तत्र यथास्थलेषु बहूनां मीमांसकानां धर्मशास्त्रकाराणां निबन्धृणां चाभिप्रायादिकम् आक्षेप — समाधानाभ्यां सप्रसङ्गं प्रदर्शितम्। तेषु प्राधान्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जरन्मैथिलाः वैयाकरणाः शब्दकौस्तुभकर्त्तारः पार्थसारथिमिश्राः, श्रीदत्तमिश्राः, श्राद्धचिन्तामणिव्याख्याकाराः, वामदेवोपाध्यायाः, देवनाथठक्कुराः, वाचस्पतिमिश्राः, श्राद्धकल्पकाराः, श्रीदत्तोपाध्यायाः, अतिजरन्मैथिलाः, सदानन्दठक्कुराः, पितृभक्तितरङ्गिणीकाराः, जीर्णोद्धारकर्त्तारः, कृत्यरत्नाकरकाराः, मधुसूदनठक्कुराः, समयप्रदीपजीर्णोद्धारकर्त्तारः, गोविन्दठक्कुराः, नवीनवाचस्पति- मिश्राः, खण्डदेवभट्टाः, मीमांसावार्तिककाराः इत्यादयः शास्त्रार्थतत्त्वज्ञाः वैदिकमार्ग —प्रवर्तकाः प्रसिद्धाः सन्त्याचार्याः । एवं चाऽस्मिन् ग्रन्थे शब्दसंक्षेपेऽपि अत्यन्तगहनार्थविवेचनेन इदं मीमांसारसपल्वलमिति मीमांसाशास्त्रे सुप्रसिद्धं बहूपयुक्तं चेति ।

मीमांसारसपल्लवलकारप्रसङ्गे ग्रन्थभूमिकायां सम्पादकेन डा० किशोरनाथझामहाभागेन सम्यगुक्तं यत्- 'इन्द्रपतिरयं मैथिलश्रोत्रियभूसुरवंशविशेषस्य कर्म्महाबेहटकुलमूलस्यावतंसः वत्सगोत्रीयः सूक्तिमुक्तावल्यादि — विविधकाव्यग्रन्थप्रणेतुर्महामहोपाध्यायस्य हरिहरस्य भ्रातुः ज्योतिर्विदो नीलकण्ठस्य पौत्रः ज्योतिर्विदः रुचिपतेः पुत्र आसीत् । .....यद्यप्यस्य तनूजन्मा कृष्णपतिः मैथिलपंजीप्रबन्धे महामहोपाध्यायरूपेणोल्लिखितोऽस्ति तथापि कृष्णपतेः पौत्रस्य झलहनशर्म्मणो निरपत्यतया छिन्नतां गतोऽस्य वंशानुक्रमेति दुःखस्थानम् ।' वस्तुतो हि एतेषां जन्मभूमौ मधुबनी-मण्डलान्तर्गते मिथिलायां 'बिट्ठो' ग्रामे ये इदानीं निवसन्ति, ते तु इन्द्रपतेरग्रजस्य वंशीधरोपाध्यायस्य महामहोपाध्यायस्य साक्षाद् वंश-धराः विद्यन्ते । राघवात्मजस्य महामहो० हरिहरस्यापि साक्षाद् वंश परम्परा प्रपौत्रस्य अभावात् अग्रे नागता ।

इन्द्रपतिरयं महामहोपाध्यायस्य ज्योतिर्विदः रुचिपतेः पुत्र आसीत्, माता चास्य रुक्मिणी देवी आसीत् । यथा लिखितमनेन—

'यं लेभे रुक्मिणी देवी सुरेर्रुचिपतेंस्सुतम् ।
स तनोति शिवं नत्वा मीमांसारसपल्वलम् ।।'

इयं रुक्मिणी देवी माण्डरसिंहौलकुलसम्भूतस्य परमानन्दसुतविश्वेश्वरस्य पुत्री आसीत्, यथा मिथिलायाः पंजीप्रबन्धनामके ऐतिहासिके ग्रन्थे विद्यते । तस्मादेव ग्रन्थादयमपि ज्ञायते यत् इन्द्रपतेः विवाहोऽपि अस्मिन्नेव वंशे प० मेधापति उपाध्यायस्य पुत्र्या सह जात आसीत् । मुनिप्रसिद्ध कृष्णपतिहरि-प्रसिद्धप्रेमनिधीमौ द्वौ पुत्रौ अनयोरेव आस्तामित्यपि पंजीप्रबन्धात् सिद्ध्यते । अयं प्रेमनिधिः, धर्माधर्मप्रबोधिनी-काराद् भिन्नः मीमांसकश्चासीत् । तर्ककुतूहलकारः कृष्णपतिस्तु कवि-कोविदः काव्यशास्त्री तार्किकश्चासीत् ।

नान्य-वंशीये शासनकाले यः इन्द्रपतिः आसीत्, स तु अस्माद् भिन्नः श्राद्धरत्नाकरस्य लक्ष्मीपतेर्गुरुः धर्माधर्मप्रबोधिनीकारस्य प्रेमनिधे पिता ठक्कुरोपनामकश्चासीत् । यथा धर्माधर्मप्रबोधिन्यामपि वर्तते । यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमन्मैथिलठक्कुरेन्द्रपतिजो.....इति । मीमांसारसपल्वकाराद् इन्द्रपति उपाध्यायाद् भिन्नेषु आचार्येषु ईश्वरपतिः इन्द्रदेवमिश्रः इन्द्रमणिः इन्द्रभट्टादयः महदुल्लेखनीयाः विद्वांसः विद्यन्ते ।

मीमांसा-विधिभूषणस्य रचयिता गोपाल-भट्टः अस्माकं चरितनायकस्येन्द्रपतेर्गुरुरासीत्, यथाऽनेन भणितमपि—

सिद्धान्त-सन्तानमधीत्य जैमिनेः
गोपालभट्टस्य गुरोः सकाशात् ।
संक्षेपतश्चालनमात्रमेषां
नत्वा शिवामिन्द्रपतिः करोति ।।

अयमिन्द्रपतिः महाराज—मिथिलेशयोः विष्णुसिंह—नरेन्द्रसिंहयोः सभासद आसीत्, यत्राऽनेन 'नरेन्द्र—विजय' नामकं मनोहरं काव्यं प्रणीतम् । नरेन्द्रसिंहस्य शासनकालः सन् १७४४—६१ खृष्टाब्दयोर्मध्ये आसोत् । स्वकीये काव्यशास्त्रीये ग्रन्थे अलंकारसमुद्गके तु अनेन महाराजस्य विष्णुसिंहस्यापि चर्चा कृतास्ति । यथा—

'नन्दीपतेरपर-बादरि-नामकस्य,
सम्मानितस्य मिथिलाधिप—विष्णुसिंहैः ।
भाषाकवेर्मनसि तोष-सुवृद्धिहेतो-
रेनं निबन्धमयमिन्द्रपतिस्तनोति ।।'

चर्चितोऽयमत्र नन्दीपतिरस्माकं चरितनायकस्य भागिनेयो आसोत् ।

'नत्वा शिवामिन्द्रपतिः करोति' तथा 'स तनोति शिवं नत्वा' इत्युभाभ्यां प्रमाणाभ्यामिदं प्रतीयते यत् अस्य विभूतेः सम्प्रदायः शैव आसीत् । अन्येषामपि देवी—देवतानां प्रति एतेषां श्रद्धा—आदर—पूज्यभावश्चासीत् यस्य प्रतीतिरनुभूतिश्च ग्रन्थावलोकनाज्जायते ।

इन्द्रपतेः रचनासु मीमांसारसपल्वलं, रसमार्तण्ड अलंकार—समुद्गकः, विधिविवेकप्रकाशश्चोल्लेखनीयाः मुख्यतमाश्च विद्यन्ते । तासु रचनासु प्रथमा तृतीया च द्वे प्रकाशिते स्तः । अलकार-समुद्गके ग्रन्थे मम्मटप्रतिपादितानामलंकाराणां विवेचनं स्वकीययालङ्कारपरिभाषया सह कृतं वर्तते, किन्तु क्वचित् मम्मटाचार्यस्य विरोधोऽपि दृश्यते । यथा शब्दालङ्कारस्य संख्या प्रसङ्गे नानेन चित्रं स्वीकृतम्, यत्र च अलंकारभेदान् मम्मटः उदाहरणद्वारा एव प्रदर्शयति तत्रैव इन्द्रपतिना सोदाहरण-सपरिभाषया प्रस्तूयते । रसनिरूपणात्मके रसमार्तण्डे ग्रन्थे द्वादशानां रसानां विवेचनं मीमांसा च दरीदृश्यते एवं च विधिविवेकप्रकाशः विधिविवेकस्य सुविस्तृता व्याख्या वर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोध्राहत्याकाण्डं तत्प्रतिकृतिश्च

–प्रो० हरिश्चन्द्र रेणापुरकरः

जेवरगी–निवासः, हाटेल-पीरवारस्य पृष्ठतः स्टेशनमार्गः, गुलबर्गा–२ (कर्नाटक)

[१]

क्रिस्तैकविंशशतके शरदि द्वितीये
तत्सप्तविंशदिवसेऽपि च फर्वरेश्च ।
देशे पुनश्च घटितं ह्यतिभीषणोग्रं
तं स्मारयद् विषयखण्डनघोरकालम् ॥

[२]

साबर्मतीति कथितं किल रेलयानं
गोध्रासमीपमवरुध्य मुहुर्मदीयैः ।
विस्फोटकास्त्रयुतसार्धसहस्रसंख्यैः
कक्षाचतुष्कमधियुज्य विदग्धमासीत् ॥

[३]

साकेतनामपुरि यज्ञविधिं समाप्य
सानन्दमात्मगृहमेव निवर्तमानाः ।
श्रीरामभक्तसुजना महिलाश्च बाला
जीवन्त एव विहिताः खलु भस्मसात्तैः ॥

[४]

निष्पापनिर्मलनिराकुलषष्टिसंख्याः
श्रीरामभक्तपरमा अवरुध्य यानम् ।
हिन्दुत्वमेव मनसा प्रखरं द्विषद्भि-
र्जात्यन्धमुस्लिमजनैः प्लुषिता नृशंसैः ॥

[५]

तीव्रा च तत्प्रतिकृतिर्विषये बभूव
तत्रापि गुर्जरभुवि प्रबभूव घोरा ।
गोध्राजघन्यघटनां प्रतिकर्तुकामैः–
र्हाहन्त ! निर्मलजनाः शतशो हतास्तैः ॥

[६]

निष्पापभीषणवधादतिरुष्टलोकैः
निर्दोषमुस्लिमजनाः शतशो विशस्ताः ।
मासे गतेऽपि नहि तद्विरतिं प्रयाति
प्रान्तीय शासनमभूद्विफलं निरोद्धुम् ॥

[७]

निष्पापनिर्मलवधोऽस्ति नितान्तगर्ह्य–
स्तन्मूलमेव तु न वाञ्छति कोऽपि बोद्धुम् ।
निर्दोषयात्रिकवधो ह्यतिनिन्दनीय–
स्तन्मूलकारणमभूदिति बोधनीयम् ॥

[८]

केनापि मुस्लिमजनेन च संस्थया वा
तद्घोरमुस्लिमकृतिर्नहि निन्दिताऽस्ति ।
हिन्दू-विरुद्धवमनं विदधद् 'बुखारी'
दृष्ट्वाऽपि भीषणकृतिं न जगाद किञ्चित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[९]

प्रान्तीय शासनरहश्चरसंस्थयाऽपि
नाशायि पूर्वमपि तत् खलु घोरकूटम् ।
मासोत्तरं च गतवान् खलु तत्र द्रष्टुं
राष्ट्रस्य नायकवरोऽपि च 'बाजपेयी ॥'

[१०]

पूर्वोपकल्पनविना कथमेव तत्र
घोरास्त्रशस्त्रयुतसार्धसहस्रलोकाः ।
आक्रम्य रेलशकटं रघुवीरभक्तान्
दग्धुं क्षमाः समभवन्निति चिन्तनीयम् ॥

[११]

मोदी-विरुद्धविकटोग्रकरालरोषं
कोलाहलं च विदधत् प्रतिपक्षिधुर्यैः ।
विद्रोहिमुस्लिमकृतिर्ह्यतिभीषणोग्रा
किं निन्दिता न कटुकं न तिरस्कृता तैः ॥

[१२]

हत्या च सप्तशतमुस्लिमबान्धवानां
लज्जास्पदं भवति राष्ट्रकृते ब्रुवद्भिः ।
उक्तं न रेलदहनं यदि नाभविष्य-
ल्लज्जास्पदं च हननं ह्यपि नाभविष्यत् ॥

[१३]

निष्पापमुस्लिमवधोऽस्ति नितान्तगर्ह्यो
राष्ट्रस्य खण्डनकृते तु पुनश्च देशे ।
सैवाद्य मानसिकता परिपुष्यते च
यस्या बभूव खलु भारतखण्डनं तत् ॥

[१४]

निर्वासिताः खलु भवन्ति जनाः स्वदेशे
हीत्येव शोकभरितो यदि राष्ट्रनेता ।
कश्मीरपण्डितजनान् स्वगृहान्निरस्तान्
दृष्ट्वाऽपि शोकविकलो न कथं बभूव ॥

[१५]

निर्दोषसप्तशतमुस्लिमघोरघाता-
ल्लज्जावनम्रमभवद् यदि राष्ट्रशीर्षम् ।
निष्पापघोरदहनान्नहि नामित किं
किं ते नृशंस कितवा नहि भारतीयाः ॥

[१६]

इत्थं च घोषयति चेत् खलु राष्ट्रनेता
विश्वं तदा नियतमेव विचिन्तयेद् यत् ।
सत्यं हि मुस्लिमजना भुवि भारतेऽस्मिन्
पीड्यन्त एव नितरां ननु हिन्दुलोकैः ॥

[१७]

सत्यं तु नूनमभवद् विपरीतमेव
सर्वेऽपि जातकलहाः किल भारतेऽस्मिन् ।
प्रावर्ति मुस्लिमजनैरिति भारतस्य
केन्द्रीयशासननिवेदनमस्ति नूनम् ॥

[१८]

नि.संख्यहिन्दुजन दैवतमन्दिराणि
ध्वस्तीकृतानि बहिरागतमोह्मदीयैः ।
भ्रष्टीकृना ह्यगणिता जनता स्वधर्माद्
हृत्कम्पकृद्भवति मुस्लिमनाशलोला ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१९]

संख्याविहीनमठमन्दिरदेवतानां
दुष्टाततायिपरधर्ममतासहिष्णु ।
जात्यन्धमुस्लिमजनैः कृतघोरनाश-
मुच्चैर्वदन्ति शतशस्त्रुटितावशेषाः ॥

[२०]

सत्यं तु नूनमिदमस्त्यविखण्डनीयं
यद्भारतीयलघुसंख्यकमोह्मदीयैः ।
धूर्ताङ्ग्लशासकजनैर्विरचय्य कूटं
देशं विखण्ड्य कृतमस्ति जघन्यपापम् ॥

[२१]

आङ्ग्लैः स्वशासनदृढीकरणार्थमेव
प्रोत्साहिता मुसलिमा पृथगात्मतायै ।
किन्त्वाङ्ग्लकूटमविभाव्य मुहम्मदीयै-
र्देशस्य खण्डनमकारि विनाशकारि ॥

[२२]

प्राप्यापि पाककथितं पृथगेव राष्ट्र-
मत्रत्य मुस्लिमजना न भवन्ति तुष्टाः ।
राज्यं हि हिन्दुबहुलं रुचये न तेषा
तच्छिष्ट-राष्ट्रमपि सन्ति बिभङ्क्षवस्ते ॥

(तेषामराष्ट्रियताऽसहिष्णुता च)

[२३]

येषां पवित्रतमधार्मिकपुण्यभूमि-
र्देशाद् बहिर्भवति नूनम तीव दूरम् ।
यत्प्रेरणा प्रभवमस्ति सुदूरदेशे
राष्ट्रीयताऽपि खलु संशयिताऽस्ति तेषाम् ॥

[२४]

श्रीरामकृष्णशिवबुद्धमहार्हतानां
संस्कारसंस्कृतिसुदायमहो ! निरस्य ।
स्वीकुर्वतां यवननादिरबाबराणां
राष्ट्रीयतैव सुतरां खलु शङ्कनीया ॥

[२५]

इस्लाममेव भुवि केवल सत्यधर्म
पूतं कुराणमपि चान्तिम-देववाक्यम् ।
मिथ्यैव सर्वमितरत् प्रतिपादयन्तः
सत्यं भवन्ति परधर्ममतारयस्ते ॥

[२६]

ते लोकतन्त्रमपि भारतसंविधानं
नैवाद्रियन्त इह नैव च राष्ट्रभावम् ।
राष्ट्रध्वजं न गणयन्ति न राष्ट्रगीतं
वाञ्छन्ति ते जगति मुस्लिम राज्यमेव ॥

[२७]

तेषां मते किल कुराण-हदीस-मुल्ला-
व्याख्या इति त्रितयमेव शरीयताख्यम् ।
सर्वत्र मुस्लिमजनैरनुवर्तनीय-
मन्यच्च सर्वमपि कुफ्रमिति प्रणाश्यम् ॥

[२८]

इस्लामधर्ममिह ये नहि मानयन्ति
ये भावयन्ति न पवित्रकुराणबोधम् ।
ये प्रेषितं न गणयन्ति मुहम्मदं ते
वध्या भवन्ति मनुजाः किल काफिराख्याः ॥

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोदते मे धरा सा जगन्मण्डले

-डॉ० कीर्तिवल्लभः शक्टा
शारदा ज्योतिर्भवनम्, एम० ई० एस० परिसरस्य
समक्षे खर्ककार्की चम्पावतम् २६२५२३ (उत्तरांचलः)

(१)

शोभते यस्य भाले हिमाद्रिस्सदा
पादसेवा रतस्सिन्धु शुभ्रैर्जलैः ।
गीयते यत्र गीता जनैस्श्रद्धया,
मोदते मे धरा सा जगन्मण्डले ॥

(२)

यत्र गङ्गा शुभा राजते हारवत्,
पावयन् कल्मषान् मानवानां सदा ।
यत्र गोदावरी भ्राजते मुक्तिदा
मोदते मे धरा सा जगन्मण्डले ॥

(३)

सर्वदाऽऽनन्द-सन्दोह-भावैर्वृता
वैदिकैः या धरा वन्दिता, मण्डिता ।
ऋग्युजुःसाम-गानैः पवित्रीकृता
मोदते मे धरा सा जगन्मण्डले ॥

(४)

यत्र वंशी सदा वाद्यते वादकैः,
या पुरा वादिता कृष्णगोपालकैः ।
गोपिकाः श्राविता या मुदा भूरिशः
मोदते मे धरा सा जगन्मण्डले ॥

(५)

विष्णुना या धृता सेविता नन्दिता
हर्षिताऽऽराधिता याऽवतारैर्निजैः ।
विश्वमेकं कुटुम्बं यया मानितं
मोदते मे धरा सा जगन्मण्डले ॥

(६)

गान्धिना प्रविता या प्रतापादिकैः
देशभक्तैरसंख्यैर्मनुष्यैः सदाः ।
राष्ट्ररक्षाव्रतैर्या विमुक्तीकृता
मोदते मे धरा सा जगन्मण्डले ॥

(७)

मुस्लिमैः हिन्दुभिः सिखखख्रोष्टादिकैः
पूजिता साम्प्रतं या नवीनैर्मतैः ।
विश्ववन्द्यास्ति या सच्चरित्रैर्निजैः
मोदते मे धरा सा जगन्मण्डले ॥

(८)

शान्तिविज्ञानमध्यात्मिकी भावना
यस्य देशस्य कीर्तिस्सदा राजते ।
भूतिदा भारती यत्र देदीप्यते
मोदते मे धरा सा जगन्मण्डले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वातन्त्र्यवीरगौरवम्

[स्वातन्त्र्यवीरस्य वीरसावरकरस्य जयन्ती-निमित्तं २८/५/२००२ दिनाङ्के समर्पित आदराञ्जलिः]

–श्री पं० स० त्र्यं० रहोतकरः कर्जतः (रायगढ)

(१)

अस्तु प्रणामश्चरणारविन्दे,
स्वातन्त्र्यवीरस्य विनायकस्य ।
दामोदरस्यैष महान् सुपुत्रः,
ग्रामे 'भगूरे' जननं स लेभे ॥

(२)

स्वाधीनता वा खलु केन लब्धा,
युद्धं विना नीतिरियं तथैव ।
विहत्य हत्वाऽऽमरणं प्रयोत्स्ये,
धैर्येण चोक्तं नु विनायकेन ॥

(३)

युद्धप्रशिक्षाग्रहणार्थमेव,
।वशन्तु सैन्ये स बभाण यूनः ।
चित्ते क्रियायां घन-देशभक्त्या
क्रान्तिः सशस्त्रा भविता स्वदेशे ॥

(४)

धैर्येण चाङ्ग्लाच्च पलाय्य शूरः
चिक्षेप देहं ततसागरेऽसौ ।
पलायनं छत्रपतेः स्मृतं तद्
चाग्रापुराद्यावनबन्दिवासात् ॥

(५)

सोढाः कुपीडा विपुलाप्यनेन,
तैलं प्रकर्तुं वृषभीकृतः सः ।
आजन्मकरागृहवासदण्डः
दत्तो द्विवारं च विनायकाय ॥

(६)

अस्पृश्यताया विनिवारणाय,
भाषाविशुद्ध्यर्थमसौ जनेषु ।
चकार यत्नान् बहु शंसनीयान्,
रत्ना-गिरिस्थान्-निबद्धकाले ॥

(७)

स्वदेशभक्तः किल लेखकोऽयं,
कविः स नूनं प्रतिभाविशिष्टः ।
स्वदेशभक्तिः फलिता च तस्य,
काव्येषु नाट्येषु निबन्धनेषु ॥

(७)

सम्मेलनाध्यक्षपदे बभाषे,
साहित्यकारान् विबुधान् समस्तान् ।
गृह्णीत यूयं स्वकरे भुशुण्डीः
संभिद्य हस्तैस्तव लेखनीस्ताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

T6C T65 220
2339
३२ $$२

BHARATODAYA
R. N. I. Regd No. UPBIL/1998/1485 Postal Regd. No. UA/DN-73/2002

४३६

(९)

भोः सागर त्वं नय मातृभूमिं,
काव्यं प्रसिद्धं रचयाम्बभूव ।
विलिख्य कारागृहभित्तिकायां,
दिदेश वृत्तिं घनराष्ट्रभक्तेः ॥

४३८

(१०)

प्राप्तुं स्वराज्यं युयुधे प्रदीर्घं,
विचिन्त्य नैवं स्वगृहं कदापि ।
चाफेकराणां किल कण्ठपाशः,
प्राचोदयद् राष्ट्रविमुक्तयेऽरेः ॥

(११)

अन्त्यक्रियाकर्म न तस्य गान्यम्,
आङ्ग्लप्रशंसा रुरुचे न तस्मै ।
विज्ञाननिष्ठादिगुणाश्च नाना,
आसन्नु तस्मादनुशिक्षितव्याः ॥

(१२)

आरोप्य दोषांश्च विनायकेऽस्मिन्,
गान्धीवधार्थं न्वपमानितोऽसौ ।
स्वतन्त्रतायै व्यदुनोत् स्वदेहं
मृत्युञ्जयं तं प्रणमन्त लोकाः ॥

(१३)

ताश्कन्दपुर्यां गमनं न कार्यं
विज्ञापितः शास्त्रिवरोऽपि तेन ।
जितस्य देशस्य समर्पणाय
हस्ताक्षरं तस्य बलेन चाप्तम् ॥

हरिद्वारस्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्

भारतोदयः (संस्कृत-मासिकम्)

P.O. गुरुकुलमहाविद्यालयः २४९४०५

हरिद्वारम् (उत्तराञ्चलम्)

सेवायाम्,
श्री ---,
३११ श्री कौपस-प्रमुख
वाल्मीकि संस्कृत व्यायाम
प्रदर्शनी मार्ग
काठमाण्डू (नेपाल)

(१४)

देशः ससिन्धुः प्रभवेदखण्डः,
प्रदर्शितान्ते महती मनीषा ।
दत्ता न किं भारतरत्नसंज्ञा,
तस्मै नृवीराय विनायकाय ॥

(१५)

मृत्युं पराजित्य विवेश शूरः,
मुखं नु तस्यात्मसमर्पणेन ।
लोकाः स्मरेयुर्वचसा प्रभाते,
विनायकं तं चिरवन्दनीयम् ॥

['गुञ्जारवः' इति त्रैमासिकपत्रात् साभारम्]

मुद्रकेण, प्रकाशकेन डॉ० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालयसभया ।
सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu